International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(1): 212-214
© 2023 IJSR
www.anantaajournal.com
Received: 16-10-2022
Accepted: 29-12-2022

डॉ. प्रदीपशर्मालुईंटेल
सहायकाचार्यः संस्कृतविभागः
कञ्चञ्जङ्गा-राज्य-विश्वविद्यालयः,
सिक्किमः

Corresponding Author:
डॉ. प्रदीपशर्मालुईंटेल
सहायकाचार्यः संस्कृतविभागः
कञ्चञ्जङ्गा-राज्य-विश्वविद्यालयः,
सिक्किमः

# आचार्यहरिभद्रसूरेः षड्दर्शनसमुच्चये बौद्धसिद्धान्तानां परीक्षणम्

**डॉ. प्रदीपशर्मालुईंटेल**

## प्रस्तावना

षड्दर्शनसमुच्चये आचार्येण हरिभद्रसूरिणा येन क्रमेण नाम निर्दिष्टम्, तथैव तेषां लक्षणं विवेचनीयमित्युक्त्वा अनेन नियमेन आदौ निर्दिष्टं बौद्धमतं वर्ण्यते-

**तत्र बौद्धमतं तावद्देवता सुगतः किल।**
**चतुर्णामार्यसत्यानां दुःखादीनां प्ररूपकः।।**[1]

अर्थात्- बौद्धमते निश्चयेन सुगत एव देवता मन्यते तथा तयैव देवतया दुःखादीनां चतुर्णाम् आर्यसत्यानां निरूपणं विहितम्। दुःखादीनाम् इत्युक्ते दुःख-समुदय-निरोध-मार्गाणाम्। तत्र मुग्धशिष्याणां कृते स्थलपरिचयाय सर्वप्रथमं बौद्धानां लिङ्गं तथा वेषाचारादीनां स्वरूपं निरूपितम्। चर्मधारणम्, मुण्डनम्, चर्मासनम् कमण्डलुश्चेमानि बौद्धानां लिङ्गत्वेन परिज्ञायन्ते। धातुना वर्णितं जानुपर्यन्तं वस्त्रम् एषां वेषः, तदपेक्षया शौचक्रिया तु नैकैः प्रकारैः क्रियते। मृदु शय्या, प्रातरुत्थाय दुग्धपानम्, मध्याह्ने भोजनम्, सायङ्काले फलरसः, अर्धरात्रौ ईक्षुदण्डाः शर्करा च , एतेभ्यः सर्वसुखोपभोगेभ्योऽपि अन्ते मोक्षप्राप्तिः। इमे सर्वेऽपि विषयाः शाक्यपुत्रेण बुद्धेनानुभूताः। मनोज्ञं स्वादुभोजनं विहाय मनोज्ञे रमणीयभवने मनोज्ञमृदुशयने मनोज्ञासने शयनेन अवस्थानेन च मुनिर्मनोज्ञमेव ध्यायिष्यते, तेन अन्ते दुःखस्यैव प्राप्तिर्ज्ञायते। अतो भगवता बुद्धेनोक्तं यत्सर्वं दुःखम् अयं संसार एव दुःखयुक्तो वर्तते। अतोऽस्माभिः सर्वदा अवश्यमेव एतन्निराकरणाय विचिन्तनयीयम्, सर्वे मानवाः सुखम् आनन्दं वा वाञ्छन्ति, सिद्धान्तोऽयम् अस्मज्जीवनाय फलीभूतो जायते, यतः सर्वमपि दुःखस्योन्मूलं वाञ्छन्ति।[2] सांख्यदर्शने यथा प्रोक्तम्-

**दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।**
**दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात्।।**[3]

अर्थात्- संसारेऽस्मिन् दुःखं त्रिविधं वर्तते, तद्दुःखम् अस्माभिः जिज्ञासा कर्तव्या। यदि असौ जिज्ञासा अपार्था अर्थात् अक्षमा चेत्तत्र तदेकान्तात्यन्ततोऽभावादेव। दुःखं त्रिविधम्- आध्यात्मिकम् आधिभौतिकम् आधिदैविकञ्च. तत्राध्यात्मिकं दुःखं द्विविधम्- शारीरिकं मानसिकञ्चेति।

१. **शारीरिकं** नाम वादपित्तश्लेष्मयुक्तैर्दुःखम्।
२. **मानसिकं द्विविधम्-**
   क. **प्रियाद् वियोगः**
   ख. **अप्रियेण च संयोगः।**
३. **आधिभौतिकम्- सर्पदंशनमित्यादिः**
४. **आधिदैविकम्-** हिमस्खलनम्, भूकम्पः, अतिवृष्टिः, जलप्लवः, झञ्झावातेत्यादयः।

तत्र पालिसाहित्येऽपि प्रसिद्धिरस्ति, दुःखविषये - जाति पि दुक्खा, जरा पि दुक्खा [4] इत्यादिः, संसारेऽस्मिन् जन्मग्रहणेनापि दुःखमेव लभते। जराऽपि दुःखा, यतो जरायां प्राप्त्यां श्वसनक्रियायां कष्टं भोजनमपि सम्यक्तया न पचति, इतस्ततः चलितुमपि दण्डः आवश्यको जायते। एतेन सिद्ध्यति यज्जरापि दुःखेति। संस्कृतसाहित्येऽपि अस्माभि लभ्यते-

**ग्रात्र सङ्कुचितं गतिर्विगलिता भ्रष्टा च दन्तावली,**
**दृष्टिर्नश्यति वर्धते वधिरता वक्त्रञ्च लालायते।**
**वाक्यं नाद्रियते च बान्धवजनो भार्या न शुश्रूषते,**
**हा कष्ट पुरुषस्य जीर्णवयसः पुत्रोऽप्यमित्रायते।।**

अर्थात्- जीर्णे प्राप्ते गात्रमथवा अस्माकं शरीरस्य सङ्कुचनं तथा गतिरपि विगलिता जायते, दन्तानां पङ्क्तिरपि भष्टा भवति। दृष्टौ अपि दोषः समायाति, कर्णौ अपि शब्दान् श्रोतुम् अक्षमौ भवतः एवमेव मुखात्किमपि वक्तुं काठिन्यम् अनुभूयते। बान्धवजनोऽपि तस्य वचांसि न आद्रियते। भार्या अपि तं न शूश्रुषते अथवा तं न सेवते, अतो जीर्णवयो मनुष्यो बहुकष्टयुक्तो भवति। जीर्णे प्राप्ते तस्य स्वीयपुत्रोऽपि शत्रुवद् व्यवहरतीति।

हरिभद्रसूरिकृत-षड्दर्शनसमुच्चय-माधवाचार्यकृत-सर्वदर्शसङ्ग्रहयोश्च वर्णिते चतुरार्यसत्यविषये यदि तुलना क्रियते चेत्तत्राधिको भेदो दृश्यते- षड्दर्शनसमुच्चये स्वल्पेनैव विषयोऽयं प्रतिपादितः, किन्तु एतदपेक्षया सर्वदर्शसङ्ग्रहे किञ्चिद् विस्तारपूर्वकं चतुरार्यसत्यानां प्रतिपादनं विहितम्। तत्रोच्यते- सकलोऽयं संसारः दुःखमयः, दुःखालयो दुःखसाधनञ्च। तस्मान्मोक्षोपायोऽथवा तत्त्वज्ञानं प्राप्तव्यम्। अत उच्यते- दुःखम् (Suffering), समुदायः (Cause of Suffering), निरोधः (Cessation of Suffering) मार्गश्च (Way of Cessation) तत्त्वानीमानि आर्यबुद्धेन सम्मतानि। एतेषु दुःखं प्रसिद्धम्। टीकाकारेण प्रोच्यते- आश्चर्यमिदं यद् दुःखम्, समुदायः, निरोधो मार्गश्च। एतेषु चतुर्षु तत्त्वेषु प्रसिद्धेषु सत्स्वपि मानीय 'गफ' महोदयेन स्वाङ्ग्लानुवादे इमे द्वन्द्वसमासत्वेन न स्वीकृत्य षष्ठीतत्पुरुषे स्वीकृताः लिखिताश्च- "दुःखसमूहान् निरोधयितुं चत्वारो मार्गाः विद्यन्ते" (are to the saints the four methods of suffering the aggregate the pain, page no. 30) अस्तु अर्थ तादृशः स्यात्, किन्तु निरोधाय के च ते चत्वारो मार्गाः? तर्हि भगवतो बुद्धस्य मूलोपदेशाः चतुरार्यसत्यरूपेण प्रतिपादिताः। वस्तुतो दर्शनशास्त्रस्यैव इमे चत्वारो ब्यूहाः, यथा- चिकित्साशास्त्रे चत्वारो व्यूहाः विद्यन्ते- रोगः, रोगकारणम्, आरोग्यं भैषज्यञ्च तथैव अत्रापि संसारः, संसारकारणम्, मोक्षो मोक्षोपायश्चेति चत्वारो विषयाः।[5] वैद्यकशास्त्रेण अनेनैव समत्वेन भगवान् बुद्धो 'महाभिषक्' इति आख्यायते।[6]

भगवता बुद्धेन दार्शनिकप्रश्नानां विवेचनं विनैव आर्यसत्यानामुपदेशः प्रदत्तः। सारनाथे प्रदत्तः प्रथमोपदेशः (धम्मचक्कप्पवत्तणसुत्त) द्रष्टव्यः। भगवतः कथ्यमासीद्यत् संसारे जनाः दारुणव्यथया सन्तप्ताः, तेभ्यो मोक्षोपायं न विधाय दार्शनिकतथ्यानां यथा- आत्मेश्वरकार्यकारणादीनां निराकरणं मूर्खत्वमेव। उदाहरणस्वरूपम्- यदि कश्चिद् बाणेन बिध्यते चेत्तदा तस्य औषधादिकं कार्यं न तु बाणः केन क्षिप्तः? ब्राह्मणः क्षत्रियः शूद्रो वा ? कुत्र स्थितश्चासौ ? को वर्णीयः सः? इत्यादीनां प्रश्नानां काऽवश्यकता बस्तुतो भगवता बुद्धेन दर्शनस्य ज्ञानं नापितु नीतिशास्त्रस्य ज्ञानं प्रदत्तम्। आर्यसत्येषु सिद्धान्तव्यवहारयोः अनुपमसमन्वयो दृश्यते।[7] षड्दर्शसमुच्चये चतुरार्यसत्यविषये प्रथमन्तावत् प्रतिपादितम्, किन्तु सर्वदर्शनसङ्ग्रहे सिद्धान्तोऽयम् अन्तिमे एव प्रतिपादितो वर्तते।

अत्र श्रीगुणरत्नसूरिकृत-तर्करहस्यदीपिकायाम् अथवा श्रीसोमतिलकसूरिकृतलघुवृत्तौ च चतुरार्यसत्यस्य प्रतिपादने आचार्यहरिभद्रसूरिवदेव समत्वं लभते। तदेव दुःखस्वरूपं प्रतिपाद्यमानेन आचार्येण हरिभद्रसूरिणा प्रोच्यते-

**दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्तिताः।**
**विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च।।[8]**

अर्थात्- संसारिस्कन्धा एव दुःखाः, विज्ञान-वेदना-संज्ञा-संस्कार-रूपाणि पञ्चस्कन्धाः प्रोक्तानि। तत्र स्कन्ध इति कः? प्रश्ने सचेतनाचेतनयोः परमाण्वोः प्रचयः स्कन्धः इत्युच्यते। यदि आचार्यहरिभद्रसूरिकृत-षड्दर्शनसमुच्चये माधवाचार्यकृत-सर्वदर्शनसङ्ग्रहे च तुलना क्रियते चेत् श्लोके तु साम्यत्वं दृश्यते एव।

### पञ्चस्कन्धानां परीक्षणम्-

चित्तस्य चित्तविकाररूपेण अयं स्कन्धोऽथवा (अमूर्ततत्त्वम्) पञ्चविधः – १. रूपस्कन्धः, २. विज्ञानस्कन्धः, ३, वेदनास्कन्धः, ४. संज्ञास्कन्धः ५. संस्कारस्कन्धश्च। तद्विषयैः साकमिन्द्रियाणां नाम रूपस्कन्धः, येषां व्युत्पत्तयः सन्ति, तैः विषयाणां निरूपणं सञ्जायते। तानीन्द्रियाणि यानि च निरूप्यन्ते, ते विषया एव। आलयविज्ञान-प्रवृत्तिविज्ञानयोः प्रवाहः विज्ञानस्कन्धः, इत्युच्यते। केवलम् अयमेव स्कन्धः चित्तं वर्तते, अवशिष्टा चैत्तमथवा चित्तविकारा विद्यन्ते। पूर्वोक्तेन द्वयोरेव स्कन्धयोः सम्बन्धेन उद्भूतानां सुखदुःखादीनां प्रवाहः परम्परा वा वेदनास्कन्ध इत्युच्यते। गौरित्यादीनां शब्दव्यक्तृज्ञानानां प्रवाहः संज्ञास्कन्धः वर्तते। वेदनास्कन्धे आधारित-द्वेषादिक्लेशः, मदमानादिरूपक्लेशाः (अल्पकष्टम्) धर्माधर्मौ संस्कारस्कन्धः इत्युच्यते। स्कन्धानामयं क्रमो वस्तुज्ञानाय समीचीनः, किन्तु बौद्धदर्शने विज्ञानस्कन्धाय द्वितीयस्थानापेक्षया पञ्चमं स्थानं प्रदत्तम्। आचार्यवसुबन्धुना अस्यार्थम् अभिधर्मकोशे कारणानां मीमांसा क्रियते। तन्मते क्रमः स्थूलात् सूक्ष्मं प्रति गच्छति, संस्कारापेक्षया विज्ञानं सूक्ष्मं सुगमञ्च न। इमे स्कन्धाश्रित्तेन तस्य विकारैः सम्बद्धाः, एषु विज्ञानस्कन्धः चित्तम् अपरे च स्कन्धास्तस्य विकारस्वरूपाः। चैत्तानन्तरं चित्तस्य वर्णनमपि सम्भवम्।[9] येन लोके 'अहमस्मि' 'इदं मम' इत्यादीनाम् अहङ्कारममकाररूपाणां समस्तरागादिभावानां समूहः समुत्पद्यते, स च 'समुदयः' इत्युच्यते।[10]

आचार्यबलदेवोपाध्यानुसारं भगवता बुद्धेन आत्मनः स्वतन्त्रसत्ता अस्वीकृता, परन्तु तेन मनसस्तथा मानसिकवृत्तीनां सत्ता सर्वथा स्वीकृता। यतो हि आत्ज्ञानमपि मानसिकव्यापारे एव जायते, स्कन्धस्यार्थः- समुदयः, एतेषाम् अपलापः कथमपि भवितुं नार्हति। आत्मा तु केवलं पञ्चस्कन्धानां सङ्घातमात्रम्। एतेषां स्कन्धानां व्याख्यायां बौद्धग्रन्थेषु पर्याप्तमतभेदो विद्यते, वस्तुतः प्रत्येकं जीवः, 'नामरूपात्मकः'। रूपेण अभिप्रायः शरीरस्य भौतिकरूपेण वर्तते नाम च मानसिकप्रवृत्तिर्वर्तते। शरीर-मनसोः परस्परं संयोगेनैव मानवस्य स्थितिर्वर्तते। नाम चतुर्षु भागेषु विभक्तम्- विज्ञानम्, वेदना, संज्ञा संस्कारश्च। अत्राचार्यबलदेवेन आत्मशब्दस्य प्रयोगो विहितः, किन्तु बौद्धदर्शनमनात्मवादिदर्शनं वर्तते। तत्र मिलिन्दप्रश्ननामके (मिलिन्दपञ्ञो) ग्रन्थे भदन्तनागसेन यवनराजो मिलिन्दः आत्मनो बुद्धसम्मतम् आत्मसिद्धान्तं रोचकरूपेण अबोधयदिति इतिहासकारेण 'मिनैण्डर'महोदयेन ई.पूर्व-द्वितीयशताब्द्यां प्रतिपादितम्। एतेन ज्ञायते यद् बौद्धदर्शनेऽपि आत्मनः प्रतिपादनं क्रियते। वस्तुतो विज्ञानस्कन्ध एव आत्मनो वासस्थानं विद्यते इति।[11]

### क्षणिकवादस्य परीक्षणम्-

बौद्धानां सिद्धान्तो वर्तते- क्षणिकवादः, यत्किमपि अस्मिन् जगति विद्यते, तत्सर्वं क्षणिकमेव इति। यावन्तोऽपि संस्कारास्ते क्षणिका एव, सर्वस्मात् सूक्ष्मकालः 'क्षणः' इत्युच्यते। बौद्धानुसारं वस्तूनां त्रिकालाबाधितसत्ता न भवति, एकस्मिन् क्षणे उत्पद्यते द्वितीये क्षणे च स्वतो विनश्यति। यथा- नद्यां जलबिन्दवः उत्पद्यन्ते विनश्यन्ति च, एवमुदाहरणं बुद्धमतावलम्बिभिः प्रदीयते, जगतः सर्वेऽपि पदार्थाः स्वस्वकारणैः उत्पद्यन्ते। इयं क्षणिकभावना मार्गतत्त्वं तथा रागादिवासनानां विनाशो निरोधोऽथवा 'मोक्षः' इत्युच्यते। उदाहरणस्वरूपम्, यथा- प्रज्वलिते अग्नौ अग्निकणो भवति, अस्माभिः स्थिरा एव दृश्यते, किन्तु सा स्थिरा अस्थिरैव अथवा तत्र विविधाः अग्निकणा भवन्ति। एको नश्यति अपर उत्पद्यते, स नश्यति अपर उत्पद्यते इति। अपरम् उदाहरणम्, यथा- चलायमानायां नद्यां प्रवर्तनीयमेव जलं न भवति अथवा एवं जलबिन्दु उत्पद्यते नश्यति च । पुनरपरं जलबिन्दु उत्पद्यते तथा पुनर्विनश्यति। अत उच्यते- 'नद्याः जलं न कदापि अशुद्धमिति'। यथा- यत्सत् तत्क्षणिकमेव, अक्षणिकत्वेऽर्थक्रियाविरोधात् तल्लक्षणवस्तुतत्त्वं हीयते।[12]

असौ क्षणिकवादः केवलं भौतिकव्यवहाराय वर्तते उत वा संवृत्तिसत्तायै नापितु पारमार्थिकसत्तायै एव वर्तते। यतो जगत्पदार्थानां क्षणिकत्वं व्यवहारेण व्यवहार-परमार्थयोरुत्पत्तिः कथमपि न सिद्ध्यति। वस्तुषु क्षणिकेषु फलं समुत्पादयितुं काऽपि क्रिया नावतिष्ठते। यतः फलोत्पत्तये अपरे क्षणे क्रियाया विद्यमानं परमावश्यकम्, किन्तु बौद्धानुसारं क्रिया तु क्षणिकैव।[13]

अतः असौ स्वफलोत्पादना विनैव अतीते विलीयते, दोषस्यास्य नाम 'कृतप्रणाशः' अथवा कृतकर्मणो विनाशो विद्यते। अकृतकर्मप्राणिना स्वयमेवाकृतकर्मणः फलं भोक्तव्यम्। दोषस्यास्य नाम 'अकृतकर्म-भोगः' इति, प्राणिनां जन्म तु इह जगति कर्मफलं भोक्तुमेव जायते, किन्तु अनेन सिद्धान्तेन प्राणिनस्तु क्षणिका एव। यत्कार्यं तैर्विहितं तद्भोक्तुं तेनावसर एव नोपलभ्यते, फलतः तस्मिन् उत्तरदायित्वस्य अभावः

सिद्ध्यति, येन संसारोत्पत्तये एव न किमपि कारणमुपयुङ्क्ते। अतः क्षणिकवादग्रहणेन संसारभङ्गस्यापि प्रसङ्गः उपस्थीयते। मोक्ष-सिद्धान्तस्य अथवा निर्वाणसिद्धान्तस्यापि क्षणिकवादोऽयम् आघातसदृश एव वर्तते। बौद्धधर्मे मोक्षमवाप्तये अथवा निर्वाणमवाप्तये आर्याष्टाङ्गिकमार्गा विधीयन्ते, किन्तु कर्मफलक्षणिकत्वाद् निर्वाणमवाप्तिरेव सुतराम् असम्भवा। तर्हि तत्र निर्वाणमवाप्तये मार्गोपदेशेन को लाभः? इत्यस्मिन् संशये एतेन साकं स्मृतिभङ्गोऽपि क्षणिकवादस्य निराकरणाय एकं प्रबलं व्यावहारिकं प्रमाणं वर्तते। सर्वेषामनुभवेन ज्ञायते यत्तत्र स्मृतिकर्त्ता उत वा अनुभवकर्त्ता एक एव जनः स्यात्। पदार्थस्मरणं तेनैव क्रियते, येन तदनुमितम्। क्षणिकवादस्वीकरणेन व्यवस्थेयं सम्यङ्न चलति, यतः कस्यचिद् वस्तुनः स्मर्ता अद्य देवदत्तः अद्यतनकालिको भवति, श्वस्तनीयस्मर्ता देवदत्तः पूर्वदिवसकालिको भवति। देवदत्तेन ह्योऽनुमितः अद्य स्मरति, किन्तु क्षणिकवादस्वीकृतेन अनुभवकर्तृस्मर्त्तोः देवदत्तयो एकत्वं नैव सिद्ध्यति। येन देवदत्तेनानुमितः, वस्तुतः सोऽतीतकालिकोऽभवद् यश्च देवदत्त इदं स्मरति, स वर्तमानकालिको विद्यते। तत्र द्वयोरेव भेदः स्पष्टः, अस्यां दशायां स्मृतिसदृशो मानसव्यापारो न व्यवस्थीयते।[14]

अतो लौकिकशास्त्रीयाभ्याम् उभाभ्यां दृष्टिभ्यां क्षणिकवादः तर्कशिखरं न याति। क्षणिकवादस्याङ्गीकारेण धार्मिकविषयेषु भूरिशः अनवस्था अवतिष्ठते, विषयोऽयं जयन्तभट्टेनाचार्येण न्यायमञ्जर्यां सुतीक्ष्णशब्दैः प्रतिपादितः। तेनोक्तं यत् फलभोगाय यदा आत्मैव न स्यात् तर्हि स्वप्राप्तये चैत्यपूजायाः को लाभः? यदा संस्कार एव क्षणिकस्तथा नैकानि वर्षाणि स्थितानि विहारनिर्माणेन को लाभः? का वा आवश्यकता? प्रसङ्गेऽस्मिन् आचार्यजयन्तभट्टेन विलिखितम्-

**नास्त्यात्मा फलभोगमात्रमथ च स्वर्गाय चैत्यार्चनं,**
**संसाराः क्षणिका युगस्थितिभृतश्चैते विहाराः कृताः।**
**सर्वं शून्यमिदं वसूनि गुरवे देहीति चादिश्यते,**
**बौद्धानां चरितं किमन्यदियती दम्भस्य भूमिः परा।।**[15]

बौद्धदर्शने प्रमाणद्वयं स्वीक्रियते- प्रत्यक्षानुमानम्, बौद्धनैयायिकैः प्रमाणशास्त्रं प्रति विशेषतया ध्यानं प्रदीयते। वैदिकदार्शनिकसमं भगवतो बुद्धस्यापि इदं प्रधानं मतमासीत्, ज्ञानमवाप्तिं विना निर्वाणं न लभ्यते- 'ऋते ज्ञानान्न मुक्तिः'।[16] सर्वेषां अज्ञानानां मूलम् अविद्यैव इमाम् अविद्याम् अपाकर्तुम् एकोपायो विशुद्धज्ञानमवाप्तिरेव, परन्तु कथं ज्ञानं विशुद्धिः स्यात् ज्ञानोत्पन्ने कियद् व्यवधानं विद्यते इमान् विषयान् प्रति बौद्धाचार्याणां ध्यानमाकृष्टम्, बौद्धन्यायः अस्यैव प्रयासस्य फलं विद्यते। अस्यैव प्रमुखसिद्धान्तः सङ्क्षेपेणात्र प्रतिपाद्यते। मानाधीना मेयसिद्धिरिति सिद्धान्तो नैयायिकानाम्, किन्तु बौद्धानां एतद्विपरीतमेव- 'मेयाधीना मानसिद्धिरिति'। यतो हि प्रमाणं द्विविधम्, अतः प्रमेयमपि द्विविधमेवेति।[17]

**सन्दर्भ**


१. बौद्धदर्शनमीमांसा
२. सर्वदर्शसंग्रह
३. षड्दर्शनसमुच्चय
४. प्रमाणवार्तिकम्
५. न्यायमञ्जरी
६. ऋग्वेद
७. व्यासभाष्यम्
८. सांख्यकारिका
९. दीघनिकाय
१०. हेतुविद्या
११. मिलिन्दप्रश्नः
१२. विमानवत्थुपालि
१३. थेरगाथा-थेरीगाथापालि
१४. इतिवुत्तकपालि
१५. बुद्धवंस-अट्ठकथा
१६. मूलपण्णासपालि,
उपरिपण्णासपालि